ते तेपुण्यमासाद्यसुरेंद्रलोक मश्नंतिदिव्यान्दिविदेवभोगान् २० तेतंभु
क्त्वास्वर्गलोकंविशालं क्षीणेपुण्येमर्त्यलोकेंविशंति एवंत्रयीधर्ममनुप्र
पन्ना गतागतंकामकामालभंते २१ अनन्याश्चिंतयंतोमां येजनाःपर्युपा
सते तेषांनित्याभियुक्तानां योगक्षेमंवहाम्यहं २२ येप्यन्यदेवताभक्ताः राम
३०

यजंतेश्रद्धयान्विताः तेपिमामेवकौंतेय यजंत्यविधिपूर्वकं २३ अहंहिसर्वयज्ञा
नां भोक्ताचप्रभुरेवच नतुमामभिजानंति तत्त्वेनातश्च्यवंतिते २४ यांतिदेव
व्रतादेवान् पितॄन्यांतिपितृव्रताः भूतानियांतिभूतेज्या यांतिमद्याजिनोपिमां २५
पत्रंपुष्पंफलंतोयं योमेभक्त्याप्रयच्छति तदहंभक्त्युपहृतमश्नामिप्रयतात्म
नः २६ यत्करोषियदश्नासि यज्जुहोषिददासियत् यत्तपस्यसिकौंतेय
यत्कुरुष्वमदर्पणं २७ शुभाशुभफलैरेवं मोक्ष्यसेकर्मबंधनैः संन्यासयो
गयुक्तात्मा विमुक्तोमामुपैष्यसि २८ समोहंसर्वभूतेषु नमेद्वेष्योस्तिनप्रि
यः येभजंतितुमांभक्त्या मयितेतेषुचाप्यहं २९ अपिचेत्सुदुराचारो भज

भगवद्गी० ३१

तेमामनन्यभाक् साधुरेवसमंतव्यः सम्यग्व्यवसितोहिसः ३० क्षिप्रंभवतिधर्मात्मा शा
श्वच्छांतिंनिगच्छति कौंतेयप्रतिजानीहि नमेभक्तःप्रणश्यति ३१ मांहिपार्थव्य
पाश्रित्य येपिस्युःपापयोनयः स्त्रियोवैश्यास्तथाशूद्रा स्तेपियांतिपरांगतिं ३२
किंपुनर्ब्राह्मणाःपुण्या भक्तराजर्षयस्तथा अनित्यमसुखंलोकमिमंप्राप्यभज
स्वमां ३३ मन्मनाभवमद्भक्तो मद्याजीमांनमस्कुरु मामेवैष्यसियुक्त्वैव मा
त्मानंमत्परायणः ३४ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोग
शास्त्रे श्रीकृष्णार्जुनसंवादे राजविद्याराजगुह्ययोगोनाम नवमोऽध्यायः
ले ९ श्रीभगवानुवाच भूयएवमहाबाहोशृणुमेपरमंवचः य

राम
३१

तेहंप्रीयमाणायवक्ष्यामिहितकाम्यया १ नमेविदुःसुरगणाःप्रभवंनमहर्षयः
अहमादिर्हिदेवानां महर्षीणांचसर्वशः २ योमामजमनादिंच वेत्तिलोकमहे
श्वरं असंमूढःसमर्त्येषुसर्वपापैःप्रमुच्यते ३ बुद्धिर्ज्ञानमसंमोहः क्षमा
सत्यंदमःसमःसुखंदुःखंभवोभावो भयंचाभयमेवच ४ अहिंसासमतातु
ष्टिस्तपोदानंयशोयशः भवंतिभावाभूतानां मत्तएवपृथग्विधाः ५ महर्षयः
द्रा॰ सप्तपूर्वे चत्वारोमनवस्तथा मद्भावामानसाजाता येषांलोकमिमाःप्रजाः ६
एतांविभूतिंयोगंच ममयोवेत्तितत्त्वतः सोविकंपेनयोगेन युज्यतेनात्रसंश
यः ७ अहंसर्वस्यप्रभवो मत्तःसर्वंप्रवर्तते इतिमत्वाभजंतेमां बुधाभाव

भागवद्गी०
३२

समन्विताः ८ मच्चित्तामद्गतप्राणा बोधयंतः परस्परं कथयंतिश्चमांनित्यं तुष्यं
तिचरमंतिच ९ तेषांसततयुक्तानांभजतांप्रीतिपूर्वकं ददामिबुद्धियोगंतं ये
नमामुपयांतिते १० तेषामेवानुकंपार्थ महमज्ञानजंतमः नाशयाम्यात्मभा
वस्थो ज्ञानदीपेनभास्वता ११ अर्जुनउवाच परंब्रह्मपरंधाम पवित्रंपरमंभवा
न् पुरुषंशास्वतंदिव्य मादिदेवमजंविभुं १२ आहुस्त्वामृषयः सर्वे देवर्षिना
रदस्तथा असितोदेवलोव्यासः स्वयंचैवब्रवीषिमे १३ सर्वमेतदृतंमन्ये य
न्मांवदसिकेशव निहितेभगवन्व्यक्तिं विदुर्देवानदानवाः १४ स्वयमेवा
त्मनात्मानं वेत्थत्वंपुरुषोत्तम भूतभावनभूतेश देवदेवजगत्पते १५ व रांम
३२

व्याप्यतिष्ठसि कथंविद्यामहं
योगिंस्त्वा

क्तुमर्हस्यशेषेण दिव्याह्यात्मविभूतयः याभिर्विभूतिभिर्लोका निमांस्त्वंसदा
परिचिन्तयन् केषुकेषुचभावेषु चिंत्योसिभगवन्मया १७ विस्तरेणात्मनोयोगं
विभूतिंचजनार्दन भूयःकथयतृप्तिर्हि शृण्वतोनास्तिमेमृतं १८ श्रीभगवा
नउवाच हंततेकथयिष्यामि दिव्याह्यात्मविभूतयः प्राधान्यतःकुरुश्रेष्ठ ना
स्त्यंतोविस्तरस्यमे १९ अहमात्मागुडाकेश सर्वभूताशयस्थितः अहमादिश्च
मध्यंच भूतानामंतएवच २० आदित्यानामहंविष्णुर्ज्योतिषांरविरंशुमान् मरी
चिर्मरुतामस्मि नक्षत्राणामहंशशी २१ वेदानांसामवेदोस्मि देवानामस्मिवा
सवः इंद्रियाणांमनश्चास्मि भूतानामस्मिचेतना २२ रुद्राणांशंकरश्चा

गवद्गी०
३३

स्मि वित्तेशोयक्षरक्षसां वसूनांपावकश्चास्मि मेरुःशिखरिणामहं २३ पुरोधसांच
मुख्यंमां वुद्धिपार्थवृहस्पतिं सेनानीनामहंस्कंदः सरसामस्मिसागरः २४ महर्षी णां
भृगुरहं गिरामस्म्येकमक्षरं यज्ञानांजपयज्ञोस्मि स्थावराणांहिमालयः २५ अश्व
त्थःसर्ववृक्षाणां देवर्षीणांचनारदः गंधर्वाणांचित्ररथः सिद्धानांकपिलोमुनिः २६
उच्चैःश्रवासमश्वानां विद्धिमाममृतोद्भवं ऐरावतंगजेंद्राणां नराणांचनराधि
पं २७ आयुधानामहंवज्रं धेनूनामस्मिकामधुक् प्रजनश्चास्मिकंदर्प्पः सर्पाणा
मस्मिवासुकिः २८ अनंतश्चास्मिनागानां वरुणोयादसामहं पितॄणामर्यमाचा
स्मि यमःसंयमतामहं २९ प्रह्लादश्चास्मिदैत्यानां कालःकलयतामहं मृगा

राम
३३

णांचमृगेंद्रोहं वैनतेयश्चपक्षिणां ३० पवनःपवतामस्मि रामःशस्त्रभृतामहं झ
षाणांमकरश्चास्मि स्रोतसामस्मिजाह्नवी ३१ सर्गाणामादिरंतश्च मध्यंचैवाहमर्
जुनः अध्यात्मविद्याविद्यानां वादःप्रवदतामहं ३२ अक्षराणामकारोस्मि द्वं
द्वःसामासिकस्यच अहमेवाक्षयःकालोधाताहंविश्वतोमुखः ३ मृत्युःसर्वह
रश्चाहमुद्भवश्चभविष्यतां कीर्तिःश्रीर्वाक्चनारीणां स्मृतिर्मेधाधृतिःक्षमाः ३४
बृहत्सामतथासाम्नां गायत्रीछंदसामहं मासानांमार्गशीर्षोहं ऋतूनांकु
सुमाकरः ३५ द्यूतंछलयतामस्मि तेजस्तेजस्विनामहं जयोस्मिव्यवसायोस्मि
सत्वंसत्ववतामहं ३६ वृष्णीनांवासुदेवोस्मि पांडवानांधनंजयः मुनीनामप्य

हंव्यासः कवीनामुसनाकविः ३७ ओषधीनांजवश्चास्मिधातूनामस्मिकांचनं
सर्वेषांतृणजातीनां दर्भोहंपाण्डुनंदन ३८ दंडोदमयतामस्मि नीतिरस्मिजि।
गीषितां मौनंचैवास्मिगुह्यानां ज्ञानंज्ञानवतामहं ३८ यच्चापिसर्वभूतानांवी
जंतदहमर्जुन नतदस्तिविनायत्स्यान्मयाभूतंचराचरं ३९ नांतोस्मिममदि
व्यानां विभूतीनांपरंतपः एषतूद्देशतःप्रोक्तो विभूतेर्विस्तरोमया ४० यद्य
द्विभूतिमत्सत्वं श्रीमदूर्जितमेववा तत्तदेवावगछत्वं ममतेजोंशसंभवं ४१
अथवाबहुनैतेन किंज्ञातेनतवार्जुनः विष्टभ्याहमिदंकृत्स्न मेकांशेनस्थितो
जगत् ४२ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ

ष्णार्जुनसंवादेविभूतियोगोनामदशमोध्यायः १० श्रीभगवानुवा
चः विभूतिवैभवंप्रोच्य कृपयापरयाहरिः ददृक्षोरर्जुनस्याथ विश्वरूपमद
र्शयत् अर्जुन उवाच मदनुग्रहायपरमं गुह्यमध्यात्मसंज्ञितं यत्त्वयोक्तंवच
स्तेन मोहोयंविगतोमम १ भवाप्ययौहिभूतानां श्रुतौविस्तरशोमया त्वत्तः
कमलपत्राक्ष माहात्म्यमपिचाव्ययं २ एवमेतद्यथात्थत्व मात्मानंपरमेश्वरं द्र
ष्टुमिच्छामितेरूप मैश्वरंपुरुषोत्तम ३ मन्यसे यदितच्छक्यं मयाद्रष्टुमिति
प्रभो योगेश्वरततोमेत्वं दर्शयात्मानमव्ययं ४ श्रीभगवानुवाच पश्यमे
पार्थरूपाणि शतशोथसहस्रशः नानाविधानिदिव्यानि नानावर्णाकृ

भगवद्गी०
३५

नीनिच ५ पश्यादित्यान्वसून्रुद्रानश्विनौमरुतस्तथा वहून्यदृष्टपूर्वाणि
पश्याश्चर्याणि भारत ६ इहैकस्थंजगत्कृत्स्नंपश्याद्यसचराचरं ममदेहे
गुडाकेश यच्चान्यद्दृष्टुमिछसि ७ नतुमांशक्यसेद्रष्टु मनेनैवस्वचक्षुषा दि-
व्यंददामितेचक्षुःपश्यमेयोगमैश्वरं ८ संजय उवाचः एवमुक्त्वाततोराज
न् महायोगेश्वरोहरिः दर्शयामासपार्थाय परमंरूपमैश्वरं ९ अनेक
वक्त्रनयन मनेकाद्भुतदर्शनं अनेकदिव्याभरणं दिव्यानेकोद्यतायुधं १०
दिव्यमाल्यांवरधरं दिव्यगंधानुलेपनं सर्वाश्चर्यमयंदेव मनंतंविश्वतो
मुखं ११ दिविसूर्यसहस्रस्य भवेद्युगपदुत्थिता यदिभासदृशीसास्याद्भा
त्

राम०
३५

विश्वेश्वरविश्व ६

सस्तस्यमहात्मनः १२ तत्रैकस्थंजगत्कृत्स्नं प्रविभक्तमनेकधा अपश्यद्देवदेवस्य
शरीरेपाडवस्तदा १३ ततःसविस्मयाविष्टो हृष्टरोमाधनंजयः प्रणम्यशि
रसादेवं कृताजलिरभाषत १४ अर्जुनउवाच पश्यामिदेवांस्तवदेवदे
हे सर्वांस्तथाभूतविशेषसंघान् ब्रह्माणमीशंकमलासनस्थं मृषींश्चसर्वा
नुरगांश्चदिव्यान् १५ अनेकवाहूदरवक्त्रनेत्रं पश्यामित्वांसर्वतोनंतरू
पं नांतंनमध्यंनपुनस्तवादिं पश्यामि[illegible]रूपं १७ किरिटिनं
गदिनंचक्रिणंचतेजोरासिंसर्वतोदीप्तिमंतं पश्यामित्वांदुर्न्निरीक्ष्यंसमंता
दीप्ताऽनलार्कद्युतिमप्रमेयं १८ त्वमक्षरंपरमंवेदितव्यं त्वमस्यविश्वस्य

परंनिधानं त्वमव्ययः शास्वतधर्मगोप्ता सनातनस्त्वंपुरुषोमतोमे १९ अनादिम
ध्यांतमनंतवीर्य मनंतबाहुं शशिसूर्यनेत्रं पश्यामि त्वांदीप्तहुतासवक्त्रं स्वते
जसाविश्वमिदंतपंतं २० द्यावापृथिव्योरिदमंतरंहि व्याप्तंत्वयैकेन दिशश्चसर्वाः
दृष्ट्वाद्भुतंरूपमुग्रंतवेदं लोकत्रयंप्रव्यथितंमहात्मन् २१ अमीहित्वांसुरसं
घाविशंति केचिद्भीताः प्रांजलयोगृणंति स्वस्तीत्युक्त्वामहर्षिसिद्धसंघाः
स्तुवंति त्वांस्तुतिभिः पुष्कलाभिः २२ रुद्रादित्यावसवोयेचसाध्या विश्वेश्वि
नोमरुतश्चोष्मपाश्च गंधर्वयक्षासुरसिद्धसंघा वीक्षंते त्वांविस्मिता
श्चैवसर्वे २३ रूपंमहत्तेबहुवक्त्रनेत्रं महाबाहोबहुबाहूरुपादं बहूदरंब

दुरंष्ट्राकरालंदृष्ट्वालोकाःप्रव्यथितास्तथाहं २४ नभःस्पृशंदीप्तमनेकव र्णं
व्यात्ताननंदीप्तविशालनेत्रं दृष्ट्वाहित्वांप्रव्यथितांतरात्मा धृतिंनविंदामिशमं
चविष्णो २५ दंष्ट्राकरालानिचतेमुखानि दृष्ट्वैवकालानलसन्निभानि दिशो
नजानेनलभेचशर्म्म प्रसीददेवेशजगन्निवास २६ अमीचत्वांधृतराष्ट्र
स्यपुत्राःसर्वेसहैवावनिपालसंघैः भीष्मोद्रोणःसूतपुत्रस्तथासौ सहास्म
दीयैरपियोधमुख्यै २७ वक्त्राणितेत्वरमाणाविशंति दंष्ट्राकरालानिभयानि
कानि केचिद्विलग्नादशनांतरेषु संदृश्यंतेचूर्णितैरुत्तमांगैः २८ यथानदी
नांबहवोंबुवेगाः समुद्रमेवाभिमुखाद्रवंति तथातवामीनरलोकवीरा वि

तथैव नाशाय विशंति लोका स्तवापि वक्राणि समृद्धवेगा। २

भगवद्गी०
३०

प्रांति वक्त्राण्यभिविज्वलंति २९ यथा प्रदीप्तंज्वलनंपतंगा विशंतिनाशायसमृद्ध
वेगाः ३० लेलिह्यसेग्रसमानः समंताल्लोकान्समग्रान्वदनैर्ज्वलद्भिः तेजो
भिरापूर्य्यजगत्समग्रं भासस्तवोग्राः प्रतपंति विष्णो ३१ आख्याहिमेकोभवा
नुग्ररूपो नमोस्तुतेदेववरप्रसीद विज्ञातुमिच्छामिभवंतमाद्यं नहिप्रजानामि
तवप्रवृत्तिं ३२ श्रीभगवानुवाच कालोस्मिलोकक्षयकृत्प्रवृद्धो लोका
न्समाहर्त्तुमिहप्रवृत्तः ऋतेपित्वांनभविष्यंतिसर्वे येवस्थिताः प्रत्यनीकेषु
योधाः ३३ तस्मात्त्वमुत्तिष्ठयशोलभस्व जित्वाशत्रून्भुंक्ष्वराज्यंसमृद्धं म
यैवैतेनिहताः पूर्व मेवनिमित्तमात्रंभवसव्यसाचिन् ३४ द्रोणंचभीष्मंच

राम
३१

जयद्रथंच कर्णंतथान्यानपियोधवीरान् मयाहतांस्त्वंजहिमाव्यथिष्ठायुध्यस्वजे
तासिरणेसपत्नान् ३५ संजयउवाच एतच्छ्रुत्वावचनंकेशवस्य कृतांजलिर्वे
पमानः किरीटी नमस्कृत्वाभूयएवाह कृष्णंसगद्गदंभीतभीतः प्रणम्य ३६ अर्जुन गीत३
उवाच स्थानेहृषीकेशतवप्रकीर्त्या जगत्प्रहृष्यत्यनुरज्यतेच रक्षांसिभीतानिदि
शोद्रवंति सर्वेनमस्यंतिचसिद्धसंघाः ३७ कस्माच्चतेनमेरन्महात्मन् गरीयसेब्रह्म २५
णोप्यादिकर्त्रे अनंतदेवेशजगन्निवास त्वमक्षरंसदसत्तत्परंयत् ३८ त्व
मादिदेवः पुरुषः पुराण स्त्वमस्यविश्वस्यपरंनिधानं वेत्तासिवेद्यंचपरंचधा
म त्वयाततंविश्वमनंतरूपं ३९ वायुर्यमोग्निर्वरुणः शशांकः प्रजापतिस्त्वं

समाप्नोषि

प्रपितामहश्च नमोनमस्तेस्तुसहस्रकृत्वः पुनश्चभूयोपिनमोनमस्ते ४० नमःपुरस्ता
दथपृष्ठतस्ते नमोस्तुतेसर्वतएवसर्व अनंतवीर्यामितविक्रमस्त्वं सर्वं समाप्नोषि
ततोसिसर्वः ४१ सखेतिमत्वाप्रसभंयदुक्तं हेकृष्णहेयादवहेसखेति अ
जानतामहिमानंतवेदं मयाप्रमादात्प्रणयेनवापि ४२ यच्चावहासार्थ
मसत्कृतोसि विहारशय्याशनभोजनेषु एकोथवाप्यच्युततत्समक्षं त
त्क्षामयेत्वामहमप्रमेयं ४३ पितासिलोकस्यचराचरस्य त्वमस्यपूज्य
श्चगुरुर्गरीयान् नत्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमप्र
भाव ४४ तस्मात्प्रणम्यप्रणिधायकायं प्रसादयेत्वामहमीशमीड्यं पि

या

तेवपुत्रस्यसखेवसख्युः प्रियःप्रियार्हसिदेवसोढुं ४५ अदृष्टपूर्वंहृषितोस्मिद
ष्ट्वा भयेनचप्रव्यथितंमनोमे तदेवमेदर्शयदेवरूपं प्रसीददेवेशजगन्निवास
४६ किरीटिनंगदिनंचक्रहस्त मिच्छामित्वांद्रष्टुमहंतथैव तेनैवरूपेणचतुर्भुजेन सह
बाहो
स्रभवविश्वमूर्त्ते ४७ श्रीभगवानुवाच मयाप्रसन्नेनतवार्जुनेदं रूपंपरंदर्शि
तमात्मयोगात् तेजोमयंविश्वमनंतमाद्यं यन्मेत्वदन्येननदृष्टपूर्वं ४८ नवेदय
ज्ञाध्ययनैर्नदानैर्नचक्रियाभिर्नतपोभिरुग्रैः एवंरूपःशक्यअहंनृलोके द्र
ष्टुंत्वदन्येनकुरुप्रवीर ४९ मातेव्यथामाचविमूढभावो दृष्ट्वारूपंघोरमी
दृङ्ममेदं व्यपेतभीःप्रीतमनाःपुनस्त्वं तदेवमेरूपमिदंप्रपश्य ५० संजय

उ च । इत्यर्जुनंवासुदेवस्तथोक्त्वा स्वकंरूपंदर्शयामासभूयः आश्वासयामा
सचभीतमेनं भूत्वापुनःसौम्यरूपोमहात्मा ५१ अर्जुन उवाच । दृष्ट्वेदंमानुषं
रूपंतवसौम्यंजनार्दन इदानीमस्मिसंवृत्तः सचेताः प्रकृतिंगतः ५२ श्री ग
वान उ वा च । सुदुर्दर्शमिदंरूपं दृष्टवानसियन्मम देवाअप्यस्यरूपस्यनि
त्यंदर्शितकांक्षिणः ५३ नाहंवेदैर्नतपसानदानेननचेज्यया शक्य एवंविधो
द्रष्टुं दृष्टवानसिमांयथा ५४ भक्त्यात्वनन्ययाशक्य अहमेवंविधोर्जुन
ज्ञातुंद्रष्टुंचतत्वेन प्रवेष्टुंचपरंतपः ५४ मत्कर्मन्मत्परमो मद्भक्तः संगवर्जि
तः निर्वैरः सर्वभूतेषु यःसमामेतिपांडव ५५ देवैरपिसुदुर्दर्शं तपोयज्ञा

दिकोटिभिः भक्त्यायंभगवानेव विश्वरूपमदर्शयत् ५६ इतिश्रीभगवद्गीता
सुउपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेविश्वरूपदर्शनं
नामएकादशोध्यायः ११ अर्जुन उवाच । एवंसततयुक्तायेभक्त्यास्त्वां
पर्युपासते येचाप्यक्षरमव्यक्तं तेषांकेयोगवित्तमाः १ श्री भगवानुवाच
मय्यावेश्यमनोयेमां नित्ययुक्ता उपासते श्रद्धयापरयोपेता स्तेमेयु २०
क्ततमामताः २ येत्वक्षरमनिर्देश्यमव्यक्तंपर्युपासते सर्वत्रगमचिं
त्यंच कूटस्थमचलंध्रुवं ३ संनियम्येंद्रियग्रामं सर्वत्रसमबुद्धयः ते
प्राप्नुवंतिमामेवसर्वभूतहितेरताः ४ क्लेशोधिकतरस्तेषा मव्य

भगव॰
४०
५॰

क्तासक्तचेतसां अव्यक्ताहिगतिर्दुःखं देहवद्भिरवाप्यते ५ येतु सर्वाणिकर्माणि म
यिसंन्यस्यमत्पराः अनन्येनैवयोगेन मांध्यायंतउपासते ६ तेषामहंसमुद्धर्त्ता मृत्यु
संसारसागरात् भवामिनचिरात्पार्थ मय्यावेशितचेतसां ७ मय्येवमनआधत्स्वम
यिबुद्धिंनिवेशय निवशिष्यसिमय्येव अतऊर्ध्वंनसंशयः ८ अथचित्तंसमाधातुं
रा नशक्नोषिमयिस्थिरं अभ्यासयोगेनततोमामिच्छाप्तुंधनंजय ९ अभ्यासेप्यस
मर्थोसि मत्कर्मपरमोभव मदर्थमपिकर्माणि कुर्वन्सिद्धिमवाप्स्यसि १० अ
थैतदप्यशक्तोसि कर्तुंमद्योगमाश्रितः सर्वकर्मफलत्यागं ततःकुरुयतात्मवान् ११
श्रेयोहिज्ञानमभ्यासात् ज्ञानाद्ध्यानंविशिष्यते ध्यानात्कर्मफलत्यागस्त्यागाच्छांति राम
४०

तर

रनंतरं १२ अद्वेष्टासर्वभूतानां मैत्रःकरुणएवच निर्ममोनिरहंकारसमदुःख
सुखक्षमी १३ संतुष्टःसततंयोगी यतात्मादृढनिश्चयः मय्यर्पितमनोबुद्धि
र्योमद्भक्तःसमेप्रियः यस्मान्नोद्विजतेलोको लोकान्नोद्विजतेचयः हर्षामर्षभयो
द्वेगै र्मुक्तोयःसचमेप्रियः १५ अनपेक्षःशुचिर्दक्ष उदासीनोगतव्यथः सर्वारं
भपरित्यागी योमद्भक्तःसमेप्रियः १६ योनहृष्यतिनद्वेष्टि नशोचतिनकांक्षति
शुभाशुभपरित्यागी भक्तिमान्यःसमेप्रियः १७ समःशत्रौचमित्रेच तथामा म:६
नापमानयोः शीतोष्णसुखदुःखेषु समःसंगविवर्जितः १८ तुल्यनिंदास्तुति
मौनी संतुष्टोयेनकेनचित् अनिकेतः स्थिरमतिर्भक्तिमान्यःसमेप्रियः १९

येतुधर्म्मामृतमिदं यथोक्तंपर्युपासते श्रद्दधानामत्परमा भक्तास्तेतीवमेप्रियाः २०
इ श्री भ ग व द्गी ता सू प नि त्सु ब्र ह्म वि द्या यां यो ग शा स्त्रे श्री कृ ष्णा र्जु न सं वा
दे भ क्ति यो गो ना म द्वा द सो ध्या यः १२ अ र्जु न उ वा च प्रकृतिपुरुषंचैवक्षेत्रं
क्षेत्रज्ञमेवच एतद्वेदितुमिच्छामि ज्ञानंज्ञेयंचकेशव १ श्री भ ग वा नु वा च इ
दंशरीरंकौंतेय क्षेत्रमित्यभिधीयते एतद्योवेत्तितंप्राहुः क्षेत्रज्ञमितितद्विदः २
क्षेत्रज्ञंचापिमांविद्धि सर्वक्षेत्रेषुभारत क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानंमतंमम ३
तत्क्षेत्रंयच्चयादृक्च यद्विकारियतश्चयत् सचयोयत्प्रभावश्च तत्समासेनमेशृ॰
णु ४ ऋषिभिर्बहुधागीतं छंदोभिर्विविधैःपृथक् ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्वि

निश्चितैः ५ महाभूतान्यहंकारो बुद्धिरव्यक्तमेवच इंद्रियाणिदशैकंच पं
चचेंद्रियगोचराः ६ इच्छाद्वेषःसुखंदुखं संघातश्चेतनाधृतिः एतत्क्षेत्रंसमा
सेन सविकारमुदाहृतं ७ अमानित्वमिदंभित्व महिंसाक्षांतिरार्जवं आचा॰
र्योपासनंशौचं स्थैर्य्यमात्मविनिग्रहः ८ इंद्रियार्थेषुवैराग्य मनहंकारएवच
जन्ममृत्युजराव्याधि दुःखदोषानुदर्शनं ९ असक्तिरनभिष्वंगः पुत्रदार
गृहादिषु नित्यंचसमचित्तत्व मिष्टानिष्टोपपत्तिषु १० मयिचानन्ययोगेन
भक्तिरव्यभिचारिणी विविक्तदेशसेवित्व मरतिर्जनसंसदि ११ अध्यात्मज्ञा
ननित्यत्वं तत्वज्ञानार्थदर्शनं एतज्ज्ञानमितिप्रोक्त मज्ञानंयदतोऽन्यथा १२

भगवद्गी°
४२

ज्ञेयंयत्तत्प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते अनादिमत्परंब्रह्म नसत्तन्नासदुच्यते १३
सर्वतःपाणिपादंतत्स र्वतोक्षिशिरोमुखं सर्वतःश्रुतिमल्लोके सर्वमावृत्य
तिष्टति १४ सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितं असक्तंसर्वभृच्चैव निर्गु
णंगुणभोक्तृच १५ बहिरंतश्चभूताना मचरंचरमेवच सूक्ष्मत्वात्तदविज्ञेयं दू
रस्थंचांतिकेचतत् १६ अविभक्तंचभूतेषु विभक्तमिवचस्थितं भूतभर्तृच
तज्ज्ञेयं ग्रसिष्णुप्रभविष्णुच १७ ज्योतिषामपितज्ज्योति स्तमसःपरमुच्यते
ज्ञानंज्ञेयंज्ञानगम्यं हृदिसर्वस्यधिष्टितं १८ इतिक्षेत्रंतथाज्ञानं ज्ञेयंचो
क्तंसमासतः मद्भक्तएतद्विज्ञाय मद्भावायोपपद्यते १९ प्रकृतिंपुरुषं

रामं
४२

चैव विद्ध्यनादीउभावपि विकारांश्चगुणांश्चैव विद्धिप्रकृतिसंभवान् २० का
र्यकारणकर्तृत्वे हेतुःप्रकृतिरुच्यते पुरुषःसुखदुःखानां भोक्तृत्वेहेतुरुच्य
ते २१ पुरुषःप्रकृतिस्थोहि भुंक्तेप्रकृतिजान्गुणान् कारणंगुणसंगो
स्य सदसद्योनिजन्मसु २२ उपद्रष्टानुमंताच भर्ताभोक्तामहेश्वरः परमा
त्मेतिचाप्युक्तो देहेस्मिन्पुरुषःपरः २३ यएवंवेत्तिपुरुषं प्रकृतिंचगुणैःसह
सर्वथावर्त्तमानोपि नसभूयोभिजायते २४ ध्यानेनात्मनिपश्यंति केचि
दात्मानमात्मना अन्येसांख्येनयोगेन कर्म्मयोगेनचापरे २५ अ
न्येत्वेवमजानंतः श्रुत्वान्येभ्यउपासते तेपिचातितरंत्येव मृत्युंश्रुतिपरा

भागवद्गी० यणाः २६ यावत्संजायतेकिंचित् सत्त्वंस्थावरजंगमं क्षेत्रक्षेत्रज्ञसंयोगात्तद्वि
४३ द्धिभरतर्षभ २७ समंसर्व्वेषुभूतेषु तिष्ठंतंपरमेश्वरं विनश्यत्स्वविनश्यंतं यः
पश्यतिसपश्यति २८ समंपश्यन्हिसर्वत्र सम[illegible]वस्थितमीश्वरं नहि
नस्त्यात्मनात्मानं ततोयातिपरांगतिं २९ प्रकृत्यैवचकर्म्माणि क्रियमा
णानिसर्व्वशः यःपश्यतितथात्मान मकर्तारंसपश्यति ३० यदाभूतपृथ
ग्भाव एकस्थमनुपश्यति ततएवचविस्तारं ब्रह्मसंपद्यतेतदा ३१ अ
नादित्वान्निर्गुणत्वा त्परमात्मायमव्ययः शरीरस्थोपिकौंतेय नकरोति
नलिप्यते ३२ यथासर्व्वगतंसौक्ष्म्यादाका[illegible]नोपलिप्यते सर्व्वत्रास्थि रांम
शं व

३३
तोदेहे तथात्मानोपलिप्यते यथाप्रकाशयत्येकः कृत्स्नंलोकमिमंरविः क्षेत्रं
क्षेत्रीतथाकृत्स्नं प्रकाशयतिभारत ३४ क्षेत्रक्षेत्रज्ञयोरेव मंतरंज्ञानचक्षु
षा भूतप्रकृतिमोक्षंच येविदुर्यांतितेपरं ३५ इतिश्रीभगवद्गीतासूपनिष
त्सु ब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णार्जुनसंवादेक्षेत्रक्षेत्रज्ञनिर्देशयो
गोनामत्रयोदशोध्यायः १३ श्रीभगवानुवाच परंभूयःप्रव
क्ष्यामि ज्ञानानांज्ञानमुत्तमं यज्ज्ञात्वामुनयःसर्व्वे परांसिद्धिमितोगताः १
इदंज्ञानमुपाश्रित्य ममसाधर्म्यमागताः सर्गेपिनोपजायंते प्रलयेनव्यथं
तिच २ ममयोनिर्महद्ब्रह्म तस्मिन्गर्भंदधाम्यहं संभवःसर्व्वभूतानांत

भग०
४४

ताभवतिभारत ३ सर्व्वयोनिषुकौंतेय मूर्त्तयःसंभवंतियाः तासांब्रह्ममहद्यो।
नि रहंवीजप्रदःपिता ४ सत्वंरजस्तमइति गुणाःप्रकृतिसंभवाःनिबध्नंतिम
२ हाबाहो देहेदेहिनमव्ययं ५ तत्रसत्वंनिर्म्मलत्वात्प्रकाशक मनामयं सु।
खसंगेनबध्नाति ज्ञानसंगेनचानघ ६ रजोरागात्मकंविद्धि तृष्णासंग।
समुद्भवं तन्निबध्नातिकौंतेय कर्म्मसंगेनदेहिनं ७ तमस्त्वज्ञानजं
विद्धि मोहनंसर्व्वदेहिनां प्रमादालस्यनिद्राभिस्तंनिबध्नातिभारत ८
सत्वंसुखेसंजयति रजःकर्म्माणिभारत ज्ञानमावृत्यतुतमःप्रमादे
संजयत्युतः ९ रजस्तमश्चाभिभूय सत्वंभवतिभारत रजःसत्वतम

राम
४४

रजसोमिथुनंसत्वं सत्वस्यमिथुनंरजः उभेतुसत्वरजसीतमसोमि
थुनंस्मृतः ११

श्चैवतमःसत्वरजस्तथा १० सर्व्वद्वारेषुदेहेस्मिन् प्रकाशउपजायतेज्ञानं
यदातदाविद्याद्विवृद्धंसत्वमित्युत १२ लोभःप्रवृत्तिरारंभ कर्म्मणामशमःस्पृहा
रजस्येतानिजायंते विवृद्धेभरतर्षभ १३ अप्रकाशोप्रवृत्तिश्च प्रमादोमो
हएवच तमस्येतानिजायंते विवृद्धेकुरुनंदन १४ यदासत्वेप्रवृद्धेतु प्रलयं
यातिदेहभृत् तदोत्तमविदांल्लोकान् मलानप्रतिपद्यते १४ रजसिप्र
लयंगत्वा कर्म्मसंगिषुजायते तथाप्रलीनस्तमसिमूढयोनिषुजाय
ते १५ कर्म्मणःसुकृतस्याहुः सात्विकंनिर्म्मलंफलं रजसस्तुफलंदुःख
मज्ञानंतमसःफलं १६ सत्वात्संजायतेज्ञानं रजसोलोभएव प्रमाद
व

भगवद्गी॰ मोहौतमसो भवतोज्ञानमेवच १७ ऊर्द्धंगच्छंतिसत्वस्था मध्येतिष्टंतिराजसाः
४५ जघन्यगुणवृत्तिस्था अधोगच्छंतितामसाः १८ नान्यंगुणेभ्यःकर्त्तारं य
दाद्रष्टानुपश्यति गुणेभ्यश्चपरंवेत्ति मद्भावंसोधिगच्छति १९ गुणाने
ता नतीत्यत्रीन्देहीदेहसमुद्भवान् जन्ममृत्युजरादुःखैर्विमुक्तोमृतम
श्नुते २० अर्जुनउवाच कैर्लिंगैस्त्रीनूगुणानेता नतीतोभवतिप्रभो
किमाचारःकथंचैतां स्त्रीनूगुणाननिवर्त्तते २१ श्रीभगवानउवाच
प्रकाशंचप्रवर्त्तिंच मोहमेवचपांडव नद्वेष्टिसंप्रवृत्तानि ननिवृत्तानि
कांक्षति २२ उदासीनवदासीनो गुणैर्योनविचाल्यते गुणावर्त्तंत

राम
४५

इत्येवं योवतिष्टतिनेंगते २३ समदुःखसुखःस्वस्थः समलोष्टाश्मकांचनः
तुल्यप्रियाप्रियोधीरस्तुल्यनिंदात्मसंस्तुतिः २४ मानापमानयोस्तुल्यस्तुल्यो
मित्रारिपक्षयोःसर्वारंभपरित्यागी गुणातीतःसउच्यते २५ मांचयोव्यभि
चारेण भक्तियोगेनसेवते सगुणान्समतीत्यैतान् ब्रह्मभूयायकल्पते
२६ ब्रह्मणोहिप्रतिष्टाहममृतस्याव्ययस्यच शाश्वतस्यचधर्मस्य
सुखस्यैकांतिकस्यच २७ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मवि
द्यायां योगशास्त्रेश्रीकृष्णार्जुनसंवादे प्रकृतिगुणभेदोनामचतुर्द
शोध्यायः १४ श्री ग ने वा ऊर्द्धमूलमधःशाख मश्वत्थ

नगाव०
४६

प्राहुरव्ययं छंदांसियस्यपर्णानि यस्तंवेदसवेदवित् १ अधश्चोर्द्ध्वंप्रसता
स्तस्य शाखागुणप्रवृद्धाविषयप्रवालाः अधश्चमूलान्यनुसंततानि।
कर्मानुवंधीनिमनुष्यलोके २ नरूपमस्येहतथोपलभ्यते नांतोन
चादिर्नचसंप्रतिष्ठा अश्वत्थमेनंसुविरूढमूल मसंगशस्त्रेणदृ
ढेनछित्वा ३ ततःपदंतत्परिमार्गितव्यं यस्मिन्गतानिवर्त्तंति
भूयः तमेवचाद्यंपुरुषंप्रपद्ये यतःप्रवृत्तिःप्रसृतापुराणी ४
निर्मानमोहाजितसंगदोषा अध्यात्मनित्याविनिवृत्तकामा द्वंदै
र्विमुक्ताःसुखदुःखसंज्ञैर्गच्छंत्यमूढाः पदमव्ययंतत् ५ नतद्भास

रांम
४६

जीवलोके २

यतेसूर्यो नशशांकोनपावकः यद्गत्वानिवर्त्तंते तद्धामपरमंमम ६ ममै
वांशोजीवभूतःसनातनः मनःषष्ठानींद्रियाणि प्रकृतिस्थानिकर्षति
॥७॥ शरीरंयदवाप्नोति यच्चाप्युत्क्रामतीश्वरः गृहीत्वैतानिसंयाति वायुर्गं
स धानिवाशयात् ॥८॥ श्रोत्रंचक्षुस्पर्शनंच रसनंघ्राणमेवच अधिष्ठायम
नश्चायं विषयानुपसेवते ९ उत्क्रामंतंस्थितंवापि भुंजानंवागुण
णान्वितं विमूढानानुपश्यंति पश्यंतिज्ञानचक्षुषः ॥१०॥ यतंतोयो
गिनश्चैनं पश्यंत्यात्मन्यवस्थितं यतंतोप्यकृतात्मानो नैनंपश्यंत्य
चेतसः ॥११॥ यदादित्यगतंतेजो जगद्भासयतेखिलं यच्चंद्रमसिय

तं

भगव०
४१

च्चाग्नौ तत्तेजो विद्धि मामकं १२ गामाविश्य च भूतानि धारयाम्यहमोजसा पु
ष्णामि चौषधीः सर्वाः सोमो भूत्वा रसात्मकः १३ अहं वैश्वानरो भूत्वा प्राणिनां
देहमाश्रितः प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधं १४ सर्वस्य चाहं हृ
दि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च वेदैश्च सर्वैरहमेव वेद्यो वेदां
तकृद्वेदविदेव चाहं १५ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्ष
रः सर्वाणि भूतानि कूटस्थाक्षर उच्यते १६ उत्तमः पुरुषस्त्वन्यः पर
मात्मेत्युदाहृतः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः १७ य
स्मात्क्षरमतीतोहमक्षरादपि चोत्तमः अतोस्मि लोके वेदे च प्रथि

राम
४१

तः पुरुषोत्तमः १८ यो मामेवमसंमूढो जानाति पुरुषोत्तमं स सर्वविद्भजति मां सर्वभा
वेन भारत १९ इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ एतद्बुद्ध्वा बुद्धिमान्स्या त्कृ
तकृत्यश्च भारत २० इति श्रीभगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे
श्रीकृष्णार्जुनसंवादे पुरुषोत्तमयोगो नाम पंचदशोध्यायः १५ श्रीभगवान्
उवाच अभयं सत्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः दानं दमश्च यज्ञश्च स्वाध्याय
स्तप आर्जवं १ अहिंसा सत्यमक्रोधस्त्यागः शांतिरपैशुनं दयाभूतेष्वलोलु
प्त्वं मार्दवं ह्रीरचापलं २ तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता भवंति
संपदं दैवीमभिजातस्य भारत ३ दंभो दर्पोभिमानश्च क्रोधः पारुष्यमे

वच अज्ञानंचाभिजातस्य पार्थसम्पदमासुरी ४ दैवीसंपद्विमोक्षाय निबंधाया
सुरीमता माशुचः संपदंदैवी मभिजातोसिपांडव ५ द्वौभूतसर्गौलोकेस्मिन्दै
वआसुरएवच दैवोविस्तरशःप्रोक्तः आसुरंपार्थमेशृणु ६ प्रवृत्तिंचनिवृ
त्तिंच जनानविदुरासुराः नशौचंनापिचाचारो नसत्यंतेषुविद्यते ७ अस
त्यमप्रतिष्टंते जगदाहुरनीश्वरं अपरस्परसंभूतं किमन्यत्कामहेतुकं ८
एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयः प्रभवंत्युग्रकर्माणंक्षयायज
गतोहिताः ९ काममाश्रित्यदुष्पूरं दंभमानमदान्विताः मोहाद्गृहीत्वा
सद्ग्राहान्प्रवर्त्तंतेशुचिव्रताः १० चिंतामपरिमेयांच प्रलयांतामु

पाश्रिताः कामोपभोगपरमा एतावदितिनिश्चिताः ११ आसापाशशतैर्बद्धाः
कामक्रोधपरायणाः ईहंतेकामभोगार्थ मन्यायेनार्थसंचयान् १२ इदम
द्यमयालब्धमिदंप्राप्स्येमनोरथं इदमस्तीदमपिमे भविष्यंतिपुनर्धनं १३
असौमयाहतःशत्रुर्हनिष्येचापरानपि ईश्वरोहमहंभोगी सिद्धोहंब
लवान्सुखी १४ आढ्योभिजनवानास्मि कोन्योस्तिसदृशोमयाय
क्ष्येदास्यामिमोदिष्य इत्यज्ञानविमोहिताः १५ अनेकचित्तविभ्रांता
मोहजालसमावृताः प्रसक्ताः कामभोगेषु पतंतिनरकेशुचौ १६
आत्मसंभाविताःस्तब्धा धनमानमदान्विताः यजंतेनामयज्ञैस्ते दंभे

भगवद्गी० ४८ नाविधिपूर्वकं १७ अहंकारंबलंदर्प्पं कामंक्रोधंचसंश्रिताः मामात्मपरदेहे ''
षु [illegible] प्रद्विषंतोभ्यसूयकाः १८ तानहंद्विषतःक्रूरान् संसारेषुनराधमा
न् क्षिपाम्यजस्रमशुभा मासुरीष्वेवयोनिषु १९ आसुरीयोनिमा
पन्ना मूढजन्मनिजन्मनि मामप्राप्यैवकौंतेय ततोयांत्यधमांग
तिं २० त्रिविधंनरकस्येदं द्वारंनाशनमात्मनः कामःक्रोधस्तथालो
भ स्तस्मादेतत्त्रयंत्यजेत् २१ एतैर्विमुक्तः कौंतेय तमोद्वारैस्त्रिभिर्न
रः आचरत्यात्मनःश्रेयस्ततोयातिपरांगतिं २२ यःशास्त्रविधिमुत्सृ
ज्य वर्त्ततेकामकारतः नससिद्धिमवाप्नोति नसुखंनपरांगतिं २३ रांम
४९

तस्माच्छास्त्रंप्रमाणंते कार्याकार्यव्यवस्थितौ ज्ञात्वाशास्त्रविधानोक्तंक
र्म्मकर्त्तुमिहार्हसि २४ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायां योगशा
स्त्रे श्रीकृष्णार्जुनसंवादे देवासुरसंपत्तियोगोनामषोडशोध्यायः १६ अ
र्जुनउवाच येशास्त्रविधिमुत्सृज्य यजंतेश्रद्धयान्विताः तेषांनिष्ठातुका
कृष्ण सत्वमाहोरजस्तमः १ श्रीभगवानउवाच त्रिविधाभवतिश्रद्धा देहि
नांसास्वभावजा सात्विकीराजसीचैव तामसीचेतितांशृणु २ सत्वानु
रूपासर्वस्य श्रद्धाभवतिभारत श्रद्धामयोयंपुरुषोयो यच्छ्रद्धः सएव
सः ३ यजंतेसात्विकादेवान्यक्षरक्षांसिराजसाः प्रेतान्भूतगणां

भगवद्गी॰
५०

श्चान्ये यजंतेतामसाजनाः ४ अशास्त्रविहितंघोरं तप्यंतेयेतपोजनाः दंभा
हंकारसंयुक्ताः कामरागबलान्विताः ५ कर्षयंतः शरीरस्थं भूतग्रामम
चेतसः मांचैवांतःशरीरस्थं तान्विद्ध्यासुरनिश्चयान् ६ आहारस्त्वपि
सर्वस्य त्रिविधोभवतिप्रियः यज्ञस्तपस्तथादानं तेषांभेदमिमंशृणु
७ आयुःसत्वबलारोग्य सुखप्रीतिविवर्द्धनं रस्याःस्निग्धास्थिरा
हृद्याआहाराः सात्विकप्रियाः ८ कट्वम्ललवणात्युष्ण तीक्ष्ण रूक्षवि
दाहिनः आहाराराजसस्येष्टा दुःखशोकामयप्रदाः ९ यातयामंगत
रसं पूतिपर्युषितंचयत् उच्छिष्टमपिचामेध्यं भोजनंतामसःप्रियः राम

५०

---

१० अफलाकांक्षिभिर्यज्ञो विधिदृष्टोयइज्यते यष्टव्यमेवेतिमनःसमाधाय
ससात्विकः ११ अभिसंधायतुफलं दंभार्थमपिचैवयत् इज्यतेभरतश्रेष्ठ
तंयज्ञंविधिराजसं १२ विधिहीनमसृष्टान्नंमंत्रहीनमदक्षिणं श्रद्धाविरहि
तंयज्ञं तामसंपरिचक्षते १३ देवद्विजगुरुप्राज्ञ पूजनंशौचमार्जवं ब्र।
ह्मचर्य्यमहिंसाच शारीरंतपउच्यते १४ अनुद्वेगकरंवाक्यंसत्यंप्रि।
यहितंचयत् स्वाध्यायाभ्यसनंचैव वाङ्मयंतपउच्यते १५ मनःप्रसा
दःसौम्यत्वं मौनमात्मविनिग्रहः भावसंशुद्धिरित्येत त्तपोमानसमुच्य
ते १६ श्रद्धयापरया तप्तं तपस्तत्त्रिविधंनरैः अफलाकांक्षिभिर्यु

क्षैः सात्त्विकंपरिचक्षते १७ सत्कारमानपूजार्थं तपोदंभेनचैवयत् क्रिय
तेतदिहप्रोक्तंराजसंचलमध्रुवं १८ मूढग्राहेणात्मनोयत्पीडयाक्रि
यतेतपः परस्योत्सादनार्थंवा तत्तामसमुदाहृतं १९ दातव्यमितियद्दा
नंदीयतेनुपकारिणे देशेकालेचपात्रेच तद्दानंसात्विकंस्मृतं २०
यत्तुप्रत्युपकारार्थं फलमुद्दिश्यवापुनः दीयतेचपरिक्लिष्टंतद्राजसमु मत५
म दाहृतं २१ अदेशकालेयद्दानमपात्रेभ्यश्चदीयते असत्कृतमव
ज्ञातं तत्तामसमुदाहृतं २२ ॐतत्सदितिनिर्द्देशो ब्रह्मणस्त्रिविधः
स्मृतः ब्राह्मणास्तेनवेदाश्च यज्ञाश्चविहिताःपुरा तस्मादोमीत्यु राम

तं
दाहृत्य यज्ञदानतपःक्रिया प्रवर्त्तंतेविधानोक्ताःसततंब्रह्मवादिनां २४ तदि
त्यनभिसंधाय फलंयज्ञतपःक्रियाः दानक्रियाश्चविविधाःक्रियंतेमो
क्षकांक्षिभिः २५ सद्भावेसाधुभावेच सदित्येतत्प्रयुज्यते प्रशस्तेक
र्मणितथासच्छब्दःपार्थयुज्यते २६ यज्ञेतपसिदानेच स्थितिःसदि
म तिचोच्यते कर्मचैवतदर्थीयं सदित्येवाभिधीयते २७ अश्रद्धयाहु
तंदत्तं तपस्तप्तंकृतंचयत् असदित्युच्यतेपार्थ नचतत्प्रेत्यनोइह
२८ इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृ
ष्णार्जुनसंवादे त्रिगुणविभागयोगोनामसप्तदशोध्यायः १७

अर्ज्जुनउवाच संन्यासस्यमहावाहो तत्वमिछामिवेदितुं त्यागस्यचहृषीके
श पृथक्केशिनिषूदन १ श्रीभगवानउवाच काम्यानांकर्म्मणां
न्यासंसंन्यासंकवयोविदुः सर्वकर्म्मफलत्यागं प्राहुस्त्यागंविचक्ष
णाः २ त्याज्यंदोषवदित्येकेकर्म्मप्राहुर्म्मनीषिणः यज्ञदानतपः
कर्म्म नत्याज्यमितिचापरे ३ निश्चयंशृणुमेतत्र त्यागेभरतस
त्तम त्यागोहिपुरुषव्याघ्र त्रिविधःसंप्रकीर्त्तितः ४ यज्ञदानं
तपःकर्म्म नत्याज्यंकार्यमेवतत् यज्ञोदानंतपश्चैव पावना
निमनीषिणां ५ एतान्यपितुकर्म्माणि संगंत्यक्काफलानि

प

च कर्त्तव्यानीतिमेपार्थ निश्चितंमतमुत्तमं ६ नियतस्यतुसंन्यासःकर्म्मणो
नोपपद्यते मोहात्तस्यपरित्याग स्तामसःपरिकीर्त्तितः ७ दुःखमित्येवयत्का
र्म्म कायक्लेशभयात्त्यजेत् सकृत्वाराजसंत्यागं नैवत्यागफलंलभेत् ८ का
र्य्यमित्येवयत्कर्म नियतंक्रियतेर्ज्जुन संगंत्यक्काफलंचैव सत्यागः सात्विकोम
स तः ९ नद्वेष्ट्यकुशलंकर्म्म कुशलेनानुषज्जते त्यागीसत्वसमाविष्टो मेधावी
छिन्नसंशयः १० नहिदेहभृताशक्यं त्यक्तुंकर्म्माण्यशेषतः यस्तुकर्म्मफ
लत्यागी सत्यागीत्यभिधीयते ११ अनिष्टमिष्टंमिश्रंच त्रिविधंकर्म्मणः
फलं भवत्यत्यागिनांप्रेत्यनतुसंन्यासिनांक्वचित् १२ पंचैतानिमहावाहो

नैविर्य

भगव० ५३ कारणानिनिबोधमे सांख्येकृतांतेप्रोक्तानि सिद्धयेसर्वकर्म्मणां १३ अ-
धिष्टानंतथाकर्त्ता करणंचपृथग्विधं विविधाश्चपृथक्चेष्टा दैवंचैवात्रपं
चमं १४ शरीरवाङ्मनोभिर्यत्कर्म्मप्रारभतेनरः न्यायंवाविपरीतंवा पंचै
तेतस्यहेतवः १५ तत्रैवंसतिकर्त्तारमात्मानंकेवलंतुयः पश्यत्यकृत
बुधित्वान्नसपश्यतिदुर्म्मतिः १६ यस्यनाहंकृतोभावो बुधिर्यस्यन
लिप्यते हत्वापिसइमांल्लोकान्नहंतिननिवध्यते १७ ज्ञानंज्ञेयंपरिज्ञा
ता त्रिविधाकर्म्मनोदना करणंकर्म्मकर्त्तेति त्रिविधाकर्मसंग्रहः १८
ज्ञानंकर्मचकर्त्ताच त्रिविधेवगुणभेदतः प्रोच्यतेगुणसंख्याने यथाव राम ५३

छृणुतान्यपि १९ सर्व्वभूतेषुयेनैकं भावमव्ययमीक्षते अविभक्तंविभक्तेषु त
ज्ञानंविधिसात्विकं २० पृथक्त्वेनयज्ज्ञानंनानाभावान्पृथग्विधान् वेत्तिस
र्वेषुभूतेषु तज्ज्ञानंविधिराजसं २१ यत्तुकृत्स्नवदेकस्मिन् कार्य्येसक्तमहेतु
कं अतत्वार्थवदल्पंच तत्तामसमुदाहृतं २२ नियतंसंगरहितमरागद्वे
षतःकृतं अफलंप्रेप्सुनाकर्म्म यत्तत्सात्विकमुच्यते २३ यत्तुकामेप्सु
नाकर्म्म साहंकारेणवापुनः क्रियतेवहुलायासं तद्राजसमुदाहृतं २४
अनुवंधंक्षयंहिंसा मनवेक्ष्यचपौरुषं मोहादारभ्यतेकर्म्म यत्तत्ताम
समुच्यते २५ मुक्तसंगोनहंवादीधृत्युत्साहसमन्वितः सिद्धसिद्ध्योः

भाग्व॰ ५४ धः पं

निर्विकारः कर्त्ता सात्विक उच्यते २६ रागी कर्म्मफलप्रेप्सुं लुब्धो हिंसात्मको
ऽशुचिः हर्षशोकान्वितः कर्त्ता राजसः परिकीर्त्तितः २७ अयुक्तः प्राकृतः स्त
ब्धः सठो नैष्कृतिको लसः विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते २८ बुद्धेर्भे
दं धृतेश्चैव गुणतस्त्रिविधं शृणु प्रोच्यमानमशेषेण पृथक्त्वेन धनंजय २९
प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये बंधं मोक्षं च या वेत्ति बुद्धिः सा पा
र्थ सात्विकी ३० यया धर्ममधर्मं च कार्यं चाकार्यमेव च अयथावत्
प्रजानाति बुद्धिः सा पार्थ राजसी ३१ अधर्मं धर्ममिति या मन्यते तमसा
वृता सर्वार्थान्विपरीतांश्च बुद्धिः सा पार्थ तामसी ३२ धृत्या यया धारय

पौ

रा॰म
५४

ति मनःप्राणेंद्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सात्विकी ३३
यया तु धर्मकामार्थान् धृत्या धारयतेऽर्जुन प्रसंगेन फलाकांक्षी धृतिः सा
पार्थ राजसी ३४ यया स्वप्नं भयं शोकं विषादं मदमेव च न विमुंचति दुर्मेधा धृ
तिः सा पार्थ तामसी ३५ सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ अभ्यासाद्रम
ते यत्र दुःखांतं च निगच्छति ३६ यत्तदग्रे विषमिव परिणामेऽमृतोपमं तत्सुखं
सात्विकं प्रोक्तमात्मबुद्धिप्रसादजं ३७ विषयेंद्रियसंयोगाद्यत्तदग्रेऽमृतो
पमं परिणामे विषमिव तत्सुखं राजसं स्मृतं ३८ यदग्रे चानुबंधे च सुखं मो
हनमात्मनः निद्रालस्यप्रमादोत्थं तत्तामसमुदाहृतं ३९ न तदस्ति पृथिव्यां

गव०
५५
गीता

वादिविदेवेषुवापुनः सत्त्वंप्रकृतिजैर्मुक्तं यदेभिःस्यात्रिभिर्गुणैः ४० ब्राह्मणक्षत्रिय
विशां शूद्राणांचपरंतपः कर्म्माणिप्रविभक्तानि स्वभावप्रभवैर्गुणैः ४१ शमोद
मस्तपः शौचं क्षांतिरार्ज्जवमेवच ज्ञानंविज्ञानमास्तिक्यं ब्रह्मकर्म्मस्वभाव
जं ४२ शौर्यंतेजोधृतिर्दाक्ष्यं युद्धेचाप्यपलायनं दानमीश्वरभावश्चक्षत्र
कर्म्मस्वभावजं ४३ कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म्मस्वभावजं परिचर्यात्म
कं कर्म्म शूद्रस्यापिस्वभावजं ४४ स्वेस्वेकर्म्मण्यभिरतः संसिद्धिंलभतेन
रः स्वकर्म्मनिरतःसिद्धिं यथाविंदतितच्छृणु ४५ यतःप्रवृत्तिर्भूतानां येनस
श्रेयान् र्वमिदंततं स्वकर्म्मो विगुणः परधर्म्मात्स्वनुष्टितात् ४६ स्वभावंनियतंक
स्वकर्म[illegible]णा नमैभ्यर्च्य सिद्धिं विंदति मानव

र्म्मकुर्वन्नाप्नोतिकिल्बिषं ४७ सहजंकर्म्मकौंतेय सदोषमपिनत्यजेत् सर्व्वारंभा
हिदोषेण धूमेनाग्निरिवावृताः ४८ असक्तबुद्धिः सर्वत्र जितात्माविगतस्पृ
हः नैःकर्म्मसिद्धिंपरमां संन्यासेनाधिगच्छति ४९ सिद्धिंप्राप्तोयथाब्रह्म त
थाप्नोतिनिबोधमे समासेनैवकौंतेय निष्टाज्ञानस्ययापरा ५० बुद्ध्याविशु
द्धयायुक्तोधृत्यात्मानंनियम्यच शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौव्यु
दस्यच ५१ विविक्तसेवीलघ्वाशीयतवाक्कायमानसः ध्यानयोगपरो
नित्यं वैराग्यंसमुपाश्रितः ५२ अहंकारंवलंदर्प्पं कामंक्रोधंपरिग्र
हं विमुच्यनिर्ममःशांतो ब्रह्मभूयायकल्पते ५३ ब्रह्मभूतःप्रस

नात्मा नशोचतिनकांक्षति समः सर्वेषुभूतेषु मद्भक्तिंलभतेपरां ५४ भक्त्या
मामभिजानाति यावान्यश्चास्मितत्त्वतः ततोमांतत्त्वतोज्ञात्वा विशतेत
दनंतरं ५५ सर्वकर्म्माण्यपिसदा कुर्वाणोमद्व्यपाश्रयः मत्प्रसादादवा
प्नोति शाश्वतंपदमव्ययं ५६ चेतसासर्वकर्म्माणि मयिसंन्यस्यम
त्परः बुद्धियोगमुपाश्रित्य मच्चित्तः सततंभव ५७ मच्चित्तःसर्वदुर्गा
णिमत्प्रसादात्तरिष्यसि अथचेत्त्वमहंकारान्नश्रोष्यसिविनंक्ष्यसि ५८
यदहंकारमाश्रित्य नयोत्स्यइतिमन्यसे मिथ्यैषव्यवसायस्ते प्रकृ
तिस्त्वांनियोक्ष्यति ५९ स्वभावजेनकौंतेयनिबद्धः स्वेनकर्म्मणा

```
[OrderDescription]
,CREATED=18.09.19 12:24
,TRANSFERRED=2019/09/18 at 12:36:14
,PAGES=58
,TYPE=STD
,NAME=S0001876
,Book Name=M-610-SHRIMAD BHAGWAT GEETA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
```

```
FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,
```